परिशेषाल्लिङ्गमाकाशस्य २७ । द्रव्यत्वनित्यत्वे वायुना व्याख्याते २८ । तत्त्वम्भावेन २९ । शब्दलिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च ३० ।" सू० "इतिशब्दः प्रकारार्थः उत्क्षेपणादीन्यपि कर्म्माणि संगृह्णाति स्पर्शवद्द्रव्यसञ्चारो, निष्क्रमणं, प्रवेशनञ्च तत्कार्य्यमाकाशस्य लिङ्गमिति सांख्याः २० । तदेतद् दूषयितुमाह । निष्क्रमणप्रवेशनादिकर्म्म न तावत् समवायिकारणतया आकाशमनुमापयति कर्म्मण एकद्रव्यत्वात् एकमात्रमूर्त्तसमवायिकारणकत्वात् न कर्म्मापि व्यासज्यवृत्तीत्युक्तं न वाऽमूर्त्तवृत्तीति २१। ननु चासमवायिकारणतयैवाकाशमनुमापयिष्यति निष्क्रमणप्रवेशनादीत्यत आह । अनुक्लृप्तिर्लक्षणम् अनुकल्प्यते ज्ञाप्यतेऽनेनेति व्युत्पत्त्या, कारणान्तरस्य असमवायिकारणस्य याऽनुक्लृप्तिर्लक्षणं तद्वैधर्म्म्यादित्यर्थः । द्रव्यन्तावदसमवायिकारणं न भवत्येव असमवायिकारणता च कारणैकार्थप्रत्यासत्त्या कार्य्यैकार्थप्रत्यासत्त्या च, प्रथमा तन्तुरूपाणां पटरूपं प्रति, द्वयञ्चासमवायिकारणता महतीति संज्ञां लभते गुरुप्रतिपत्तिकत्वात्, द्वितीया च यथा आत्ममनःसंयोगस्य ज्ञानादिकं प्रति, द्वयञ्चासमवायिकारणता लघ्वीति संज्ञां लभते लघुप्रतिपत्तिकत्वात्, आकाशस्य तु निष्क्रमणप्रवेशनादौ कर्म्मणि न समवायिकारणता नाप्यसमवायिकारणता तथाच न कर्म्माकाशसत्त्वे लिङ्गमिति २२ । ननु निमित्तकारणमस्तु कर्म्मण्याकाशम्, दृश्यते ह्याकाशे पक्षिकाण्डादीनां सञ्चारमत आह । मूर्त्तसंयोगेन कर्म्मकारणस्य वेगगुरुत्वादेः प्रतिबन्धात् कर्म्मणोऽभावोऽनुत्पादो न त्वाकाशाभावात् तस्याव्यापकत्वात्, तस्मादाकाशान्वयोऽन्यथासिद्ध एव नाकाशनिमित्ततां साधयतीत्यर्थः२३। एवं सांख्यमते दूषिते शब्दमाकाशे लिङ्गमुपपादयिष्यन् परिशेषानुमानाय पीठमारचयन्नाह । पृथिव्यादिलक्षणे कार्य्ये ये विशेषगुणा रूपादयस्ते कारणगुणपूर्व्वका दृष्टाः शब्दोऽपि विशेषगुणः जातिमत्त्वे सति वाह्यैकेन्द्रियमात्रग्राह्यत्वात् रूपादिवत् तथाच तादृशं कार्य्यं नोपलभ्यते यत्र कारणगुणपूर्व्वकः शब्दः स्यादित्यर्थः२४। ननु वीणावेणुमृदङ्गशङ्खपटहादौ कार्य्ये शब्द उपलभ्यते तथाच तत्कारणगुणपूर्व्वकः स्यादत आह । भवेदेवं यथा तन्तुकपालादिषु रूपरसाद्यनुभूयते तत्सजातीयञ्च रूपरसाद्यन्तरं पटघटादावुपलभ्यते तथा वीणावेणुमृदङ्गाद्यवयवेषु यः शब्द उपलभ्यस्तत्सजातीयश्चेत् वीणावेणुमृदङ्गादावप्युपलभ्येत नचैवम्, प्रत्युत निःशब्दैरेवावयवैर्वीणाद्यारम्भदर्शनात् नोरूपैस्तु तन्तुकपालादिभिः पटघटाद्यारम्भस्यादर्शनात् किञ्च यदि शब्दः स्पर्शवतां विशेषगुणः स्यात् तदा तत्र तार-तारतर-मन्द-मन्दतरादिभावो नानुभूयेत नह्येकावयवाश्रिता रूपादयो वैचित्र्येणानुभूयन्ते तस्मान्न स्पर्शवद्विशेषगुणः शब्दः २५ ।नन्वात्मगुणो मनोगुणो वा शब्दो भविष्यतीत्यत आह । शब्दो यद्यात्मगुणः स्यात् तदाऽहं सुखी यते जाने इच्छामीत्यादिवत् अहं पूर्य्ये अहं वाद्ये अहं शब्दवानित्यादि धीः स्यात् नत्वेवमस्ति, किन्तु शङ्खः पूर्य्यते, वीणा वाद्यते इति प्रतियन्ति लौकिकाः । किञ्च शब्दो नात्मगुणः बाह्येन्द्रियग्राह्यत्वात् रूपादिवत्, अपि च शब्दो यद्यात्मयोग्यविशेषगुणः स्यात्तर्हि बधिरेणाप्युपलभ्येत दुःखादिवत् । तस्मात् सुष्ठूक्तं परत्र समवायादिति, अमनोगुणत्वे हेतुमाह प्रत्यक्षत्वादिति, नात्ममनसोर्गुण इति समासे कर्त्तव्ये यदसमासकरणं तेन तुल्यन्यायतया प्रत्यक्षत्वादित्यनेनैव हेतुना दिक्कालयोरपि गुणत्वं शब्दस्य प्रतिषिद्धमिति सूचितम् २६ । यदर्थमयं परिकरस्तदाह शब्द इति शेषः । अत्रापि शब्दः क्वचिदाश्रितो गुणत्वात् रूपादिवदिति सामान्यतोदृष्टोदृष्टद्रव्यातिरिक्तद्रव्यसिद्धिः । गुणश्चायं बाह्यैकेन्द्रियग्राह्यजातीयत्वात् रूपादिवत् अनित्यत्वे सति विभुसमवेतत्वात् ज्ञानादिवत् अनित्यत्वञ्च साधयिष्यते । परिशेषसिद्धस्य द्रव्यस्यावयवकल्पनायां प्रमाणाभावान्नित्यत्वं, सर्व्वत्र शब्दोपलब्धेर्विभुत्वम् २७ । शब्दलिङ्गस्य द्रव्यस्य द्रव्यत्वनित्यत्वे अतिदेशेन साधयन्नाह । अद्रव्यवत्त्वाद्यथा वायोर्नित्यत्वं तथाकाशस्यापि, गुणवत्त्वाद्यथा वायोर्द्रव्यत्वं तथाकाशस्यापीत्यर्थः २८। तत् किं बह्न्याकाशानि एकमेव वेत्यत आह । व्याख्यातमिति विपरिणतेनान्वयः । भावः सत्ता सा यथैका तथाकाशमप्येकमेवेत्यर्थः २९ । नन्वनुगतप्रत्ययमहिम्ना सत्ताया एकत्वं सिद्धम् आकाशे कथमेकत्वं तद्दृष्टान्तेन सेत्स्यतीत्यत आह । तत्त्वमाकाशस्य सिद्धमित्यर्थः । वैभवे सति सर्वेषां शब्दानां तदेकाश्रयतयैवोपपत्तावाश्रयान्तरकल्पनायां कल्पनागौरवप्रसङ्गः अन्यदपि यदाकाशं कल्पनीयं तत्रापि शब्द एव लिङ्गं तच्चाविशिष्टं न च विशेषसाधकं भेदसाधकं लिङ्गान्तरमस्ति । आत्मनां यद्यपि ज्ञानादिकमविशिष्टमेव लिङ्गं तथापि व्यवस्थातो लिङ्गान्तरादात्मनानात्वसिद्धिरिति वक्ष्यते ३०उप० । इत्थं च तस्य नित्यत्वं